Roll No. 166140748 | 261669

12693436

हाईस्कूल परीक्षा / High School Examination

(मुख्य / Main) वर्ष / Year - 2026

SET / सेट

D

# संस्कृत

# SANSKRIT

Total Printed Pages : 8 | Total Questions : 23 | Time : 3 Hours | Maximum Marks : 75

www.rajeshsir.co.in

निर्देशा :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

1 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत् – 1×6=6

(सुलभः, मुखम्, दानवाय, भानुः, नीलः, पुत्रः)

(i) 'सूर्यः' इत्यस्य पर्यायपदं ________ अस्ति।

(ii) 'तनयः' इत्यस्य पर्यायपदं ________ अस्ति।

(iii) 'दुर्लभः' इत्यस्य पदस्य विलोम पदं ________ अस्ति।

(iv) ________ इत्यस्य पदस्य विलोम पदं मानवाय अस्ति।

(v) 'नीलःकण्ठः' इत्यस्मिन् पदयोः विशेषणं पदं ________ अस्ति।

(vi) 'कमलम् इव मुखम्' इत्यस्मिन् पदयोः विशेष्य पदं ________ अस्ति।

2 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत – 1×6=6

(i) 'शृणोति' पदे एकवचनम् अस्ति।

(ii) 'पचति' पदे लोट् लकारः अस्ति।

(iii) 'गच्छति' पदे प्रथम पुरुषः अस्ति।

(iv) 'लिखामि' पदे लिख् धातुः नास्ति।

(v) 'प्राचार्यः' पदे आचार्यः उपसर्गः अस्ति।

(vi) 'अनुशासनम्' पदे अनु उपसर्गः अस्ति।

3 युग्ममेलनं कुरूत – 1×6=6

| | (अ) | | (ब) |
|---|---|---|---|
| (i) | हिमालयः | (क) | सदाचारः |
| (ii) | अन्य + उक्तयः | (ख) | आहारस्य अभावः |
| (iii) | व्यञ्जन् संधिः | (ग) | पितरौ |
| (iv) | निराहारम् | (घ) | अन्योक्तयः |
| (v) | अनुरूपम् | (ङ) | दीर्घ स्वर संधिः |
| (vi) | द्वन्द्व–समासः | (च) | अव्ययीभाव समासः |

4 एकपदेन उत्तरं लिखत – 1×6=6

(i) मनुष्याणां महान् रिपुः कः?

(ii) सर्वदा सर्वकार्येषु का बलवती?

(iii) जननी कीदृशी भवति?

(iv) 'गत्वा' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(v) 'हस्+तुमुन्' संयुज्य किं पदं भविष्यति?

(vi) 'वर्तमानः' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

www.rajeshsir.co.in

5 उचितं विकल्पं चित्वा लिखत – 1×6=6

(i) 'राजन्' शब्दस्य चतुर्थी विभक्तेः रुपम् अस्ति –

(अ) राजानौ (ब) राज्ञे

(स) राजसु (द) राजानम्

(ii) 'बालकः' इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) सप्तमी (ब) प्रथमा

(स) तृतीया (द) षष्ठी

(iii) 'लतासु' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) बहुवचनम् (ब) द्विवचनम्

(स) एकवचनम् (द) अन्यवचनम्

(iv) 'अस्मद्' शब्दस्य प्रथमा विभक्तेः रुपम् अस्ति –

(अ) मया (ब) मत्

(स) आवयोः (द) वयम्

(v) 'अहं श्वः वाराणसीं गमिष्यामि' इत्यस्मिन् वाक्ये अव्ययं पदम् अस्ति –

(अ) श्वः (ब) वाराणसीं

(स) गमिष्यामि (द) अहं

(vi) अधोलिखितेषु शब्देषु अव्ययं पदम् नास्ति –

(अ) यत्र (ब) तत्र

(स) सर्वत्र (द) रामः

www.rajeshsir.co.in
126934436

(प्रश्न क्रमांकः 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत–)

6 नराणां प्रथमः शत्रुः कः? 2

अथवा

उदयसमये, अस्तसमये च कः रक्तः भवति?

7 बकः कीदृशान् मीनान् क्रूरतया भक्षयति? 2

अथवा

सरसः शोभा केन भवति?

8 कविः किमर्थं प्रकृतेः शरणम् इच्छति? 2

अथवा

तपोवनवासिनः कुशस्य मातरं केन नाम्ना आह्वयन्ति?

9 बालभावात् हिमकरः कुत्र विराजते? 2

अथवा

कयोः एकः शरीरेण दुर्बलः आसीत्?

10 कस्य उपशमनस्य स्थिरोपायः नास्ति? 2

अथवा

कः वातावरणं कर्कशध्वनिना आकुली करोति?

11 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) 1×2=2

(i) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। ______ कः ______ कम्

(ii) सव्यवधानं न चारित्रलोपाय। ______ कः ______ कम्

(iii) अरे! अरे! किं जल्पसि? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः? ______ कः ______ कम्

12693436 12693436 12693436 12693436
www.rajeshsir.co.in
261669

12 रिक्तस्थानानि पूरयत – (कोऽपि चत्वारि) $\frac{1}{2}\times4=2$

(i) भूकम्पित–समये ________ गमनमेव उचितं भवति। (बहिः / अन्तः)

(ii) पर्यावरणस्य संरक्षणम् ________ प्रकृतेः आराधना। (एव / सदा)

(iii) ________ परभृत् अपि कथ्यते। (काकः / पिकः)

(iv) उलूकः ________ पदनिर्लिप्तः चासीत्। (आत्मश्लाघाहीनः / अहिभुक्)

(v) प्राकृतिक–वातावरणे क्षणं सञ्चरणम् ________ लाभदायकं भवति। (यत्र / अपि)

13 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – $\frac{1}{2}\times4=2$

(i) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

(ii) अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।

(iii) तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः।

(iv) 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा'।

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषित–श्लोकं लिखत। 2

15 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरूत – (कोऽपि द्वे) 1×2=2

(i) <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः।

(ii) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति।

(iii) <u>महानगरेषु</u> वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

16 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 1×2=2

(i) सः फलं खादति। (कर्मवाच्य)

(ii) मया ग्रन्थः पठितः। (कर्तृवाच्य)

(iii) वयम् गुरुम् पूजितवन्तः। (कर्मवाच्य)

17 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीया – (कोऽपि द्वे) 1×2=2

(i) सः पठामि।

(ii) पिता पुत्रम् सह गच्छति।

(iii) रामम् नमः

www.rajeshsir.co.in 12693436

**18** अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **1×3=3**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद–कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ?

**प्रश्नाः –**

(i) मार्गे गहनकानने सा किं ददर्श ?

(ii) राजपुत्रस्य नाम किम् ?

(iii) बुद्धिमती कया पुत्रौ प्रहृतवती ?

**अथवा**

एकोत्तर–द्विसहस्र–तमे खीष्टाब्दे (2001 ईस्वीये वर्षे) गणतन्त्र–दिवस–पर्वणि यदा समग्रमपि भारतराष्ट्रं नृत्यगीतवादित्राणाम् उल्लासे मग्नमासीत्। तदाकस्मादेव गुर्जर–राज्यं पर्याकुलं, विपर्यस्तम्, क्रन्दनविकलं विपन्नञ्च जातम्। भूकम्पस्य दारूणविभीषिका समस्तमपि गुर्जरक्षेत्रं विशेषेण च कच्छजनपदं ध्वंसावशेषेषु परिवर्तितवती।

**प्रश्नाः –**

(i) गुर्जर–राज्ये कस्मिन् वर्षे भूकम्पम् आगच्छत् ?

(ii) गुर्जर–राज्ये कस्मिन् दिवसे भूकम्पम् आगच्छत् ?

(iii) भूकम्पस्य दारूणविभीषिका विशेषेण कं जनपदं ध्वंसावशेषेषु परिवर्तितवती ?

**19** अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **1×3=3**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**प्रश्नाः –**

(i) कः प्रथमो धर्मः ?

(ii) तस्माद् किं रक्षेत् ?

(iii) इत्येतद् केषां वचः आचारः प्रथमो धर्मः ?

**अथवा**

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।

**प्रश्नाः –**

(i) किं निर्मलं नास्ति ?

(ii) समलम् किम् ?

(iii) किं भृशं दूषितम् ?

**20** अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – **1×3=3**

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः – इत इत आर्यौ।

कुशलवौ – (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः – युष्मद्–दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव न पुनरतिथि–जन–समुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो! हृदयग्राही स्पर्शः।

**प्रश्नाः –**

(i) अहो! कीदृशः स्पर्शः?

(ii) कम् उपसृत्य प्रणम्य च?

(iii) कस्य अपि कुशलम्?

**अथवा**

व्याघ्रचित्रकौ – अरे! किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः – तूष्णीं भव भोः! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अत एव विचारविमर्शः प्रचलति।

बकः – सर्वथा सम्यगुक्तम् सिंहमहोदयेन! वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।

सर्वे पक्षिणः – (उच्चैः) – आम् आम् – कश्चित् खगः एव वनराजः भविष्यति इति।

**प्रश्नाः –**

(i) केन बहुकालपर्यन्तं शासनं कृतम्?

(ii) कश्चित् खगः एव कः भविष्यति?

(iii) 'तूष्णीं भव भोः!' इति कः कथयति?

www.rajeshsir.co.in
1269343 6 1269343 6 1269343 6

**21** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **1×4=4**

अमर्त्यसेनः इति नाम एव संस्कृतमयम्। अमर्त्यसेन–वर्यस्य जन्म शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चित्तम्। अस्य नाम निर्दिशन् सः उक्तवान् आसीत् – 'अमर्त्यसेनः' इत्येषः शब्दः संस्कृतमूलः, अतः एतस्य उच्चारणं स्पष्टं स्यात्। यतः अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेनः बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्रः अभिलाषः अपि आसीत्। यत् मातामहः क्षितीशमोहनसेन इव अहम् अपि प्रसिद्धः संस्कृतविद्वान् भवेयम् इति।

**प्रश्नाः –**

(i) अमर्त्यसेनस्य मातामहस्य नाम किम् आसीत्?

(ii) अमर्त्यसेनस्य नाम केन चित्तम्?

(iii) कुत्र वसन् अमर्त्यसेनः संस्कृताभ्यासं कृतवान्?

(iv) कस्य शब्दस्य अर्थपरिवर्तनं न भवेत्?

**22** भवतः नाम विनोदः। भवान् अस्वस्थः अस्ति। अतः दिनत्रयस्य कृते स्वप्राचार्यम् प्रति अवकाशार्थम् एकम् आवेदनपत्रम् लिखत। **4**

**अथवा**

भवतः विवाहः 18-05-2026 दिनाङ्के सुनिश्चितः। भवतः मित्रम् अशोक कुमारः दिल्लीनगरे निवसति। अतः स्वमित्रस्य कृते विवाहे आमन्त्रयितुम् एकम् पत्रम् लिखत।

**23** अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – **1×4=4**

(i) आदिकविः वाल्मीकिः

(ii) सत्सङ्गतिः

(iii) भारतीया संस्कृतिः

(iv) पर्यावरणम्

(v) संस्कृतभाषायाः उपादेयता

www.rajeshsir.co.in
126934361269343612693436